पुनर्न [illegible] नाम।

१ [illegible]।
२ [illegible]।

[illegible]

राजा—नार्हसि प्रसादयितुमस्त्वया । त्वद्दर्शनेन प्रसन्नो मे सबाह्यान्तरात्मा । तत्कथय कथमियन्तं कालं मया विरहिता स्थितासि ।

(अनन्तरं चर्चरी ।)

मोरा परहुअ हंस रहंग
अलि गअ पव्वअ सरिअ कुरङ्ग ।
तुज्झह कारणे रण्ण भमन्ते
को ण हु पुच्छिअ मइ रोअन्ते ॥ ७० ॥

उर्वशी—अन्तःकरणपच्चक्खीकिदवुत्तन्तो महाराओ ।

राजा—प्रिये, अन्तःकरणमिति न खल्ववगच्छामि ।

उर्वशी—सुणादु महाराओ । पुरा भअवदा महासेणेण सा-

---

१ मयूरः परभृतो हंसो रथाङ्गो-
ऽलिगजः पर्वतः सरित्कुरङ्गः ।
तव कारणादरण्ये भ्रमता
को न खलु पृष्टो मया रुदता ॥

२ अन्तःकरणप्रत्यक्षीकृतवृत्तान्तो महाराजः ।

३ शृणोतु महाराजः । पुरा भगवता महासेनेन शाश्वतं कुमार-

न मया कारणेन [illegible] महाराज । अन्विष्यन्नुर्वशीं प्रलपति—मोरा परहुअत्ति । मयूरः [illegible] रथाङ्गोऽलिगजः पर्वतः सरित्कुरङ्गः । तव कारणेनारण्ये भ्रमता को न खलु पृष्टो मया रुदता ॥ इयं विदूषक इति [illegible] ॥ ७० ॥ उर्वशी । अन्तःकरण [illegible] महाराज । उर्वशी । शृणोतु महाराजः । पुरा भगवता महासेनेन शाश्वतं कुमारव्रतं गृहीत्वा [illegible] स्थितः । [illegible] इति त्रिकाण्डी । [illegible]

[illegible]

[illegible] ॥ १७ ॥

([illegible])

[illegible]

[illegible]

[illegible]

[illegible] ॥ १८ ॥

([illegible])

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

राजा—नाहं प्रसादयितव्यस्त्वया । त्वद्दर्शनेन प्रसन्नो मे सबाह्यान्तरात्मा । तत्कथय कथमियन्तं कालं मया विरहिता स्थितासि ।

(अनन्तरं चर्चरी ।)

मोरा परहुअ हंस रहङ्ग
अलि गअ पव्वअ सरिअ कुरङ्गम् ।
तुज्झह कारणे रण्ण भमन्ते
को ण हु पुच्छिअ मइ रोअन्ते ॥ ७० ॥

उर्वशी—अन्तक्करणपच्चक्खी किदवुत्तन्तो महाराओ ।

राजा—प्रिये, अन्तःकरणमिति न खल्ववगच्छामि ।

उर्वशी—सुणादु महाराओ । पुरा भअवदा महासेणेण सा-

---

१ मयूरः परभृतको हंसो रथाङ्गोऽ
लिगजः पर्वतः सरित्कुरङ्गः ।
तव कारणेनारण्यं भ्रमता
को न खलु पृष्टो मया रुदता ॥

२ अन्तःकरणप्रत्यक्षीकृतवृत्तान्तो महाराजः ।

३ शृणोतु महाराजः । पुरा भगवता महासेनेन शाश्वतं कुमार-

[illegible] ... पिता [illegible] ... मोरा परहुअ इति । मयूरः परभृतको हंसो रथाङ्गोऽलिगजः पर्वतः सरित्कुरङ्गः । तव कारणेनारण्यं भ्रमता को न खलु पृष्टो मया रुदता । [illegible] ॥ ७० ॥ उर्वशी । अन्तःकरणप्रत्यक्षीकृतवृत्तान्तो महाराजः । उर्वशी । शृणोतु महाराजः । पुरा भगवता महासेनेन शाश्वतं कुमारव्रतं गृहीत्वा [illegible] ... इति । [illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

उर्वशी—कधं संगमणीओ अअं मणी । अदो एव्व महाराएण आलिङ्गिदा ज्जेव पकिदित्थम्हि संवुत्ता ।

राजा—(ललाटे मणिं विनिवेश्य ।)

स्फुरता विच्छुरितमिदं रागेण मणेर्ललाटनिहितस्य ।
श्रियमुद्वहति मुखं ते बालातपरक्तकमलस्य ॥ ७२ ॥

उर्वशी—पिअंवद, गदो क्खु बहु कालो अम्हाणं पइट्ठाणादो णिग्गदाणम् । कदाइ असूअन्ति पकिदिओ अम्हाणम् । ता एहि । गच्छम्ह ।

(उत्तिष्ठतः ।)

राजा—यदाह भवती ।

उर्वशी—कधं कधं महाराओ गन्तुं इच्छदि ।

राजा—

अचिरप्रभाविलसितैः पताकिना
सुरकार्मुकाभिनवचित्रशोभिना ।
गमितेन खेलगमने विमानतां
नय मां नवेन वसतिं पयोमुचा ॥ ७३ ॥

१ कथं संगमनीयोऽयं मणिः । अत एव [illegible] प्रकृतिस्था संवृत्ता ।

२ प्रियंवद [illegible] । कदाचि[illegible] [illegible] । तदेहि । गच्छावः ।

३ अथ कथं महाराजो गन्तुमिच्छति ।

[illegible]

सह कुमारेण गेण्हिअ अकलुसो णाम गन्धमादणकच्छो अज्झासिदो । किदा अ ठिदी ।

राजा—कीदृशी ।

उर्वशी—जा किल इत्थिआ इमं देसं आगमिस्सदि सा लदाभावेण परिणदा भविस्सदि । किदो अ सावन्तो गोरीचरणराअसंभवं मणिं वज्जिअ लदाभावं ण मुञ्चिस्सदि त्ति । तदो अहं गुरुसावसम्मूढहिअआ विसुमरिददेवदाणिअमा अप्पकाजणपरिहरणीअं कुमारवणं पविट्ठा । पवेसाणन्तरं अ काणणोवन्तवत्तिलदाभावेण परिणदं मे रूवम् ।

राजा—प्रिये, सर्वमुपपन्नम् ।

रतिखेदसुप्तमपि मां शयने या मन्यसे प्रवासगतम् ।
सा त्वमिहैनदवस्थं कथं सहेथाश्चिरवियोगम् ॥ ७१ ॥

इदं पौरस्त्याकथितं संगमनिमित्तं पुरस्तन्मणिमयमासादितम् [illegible] ।
(इति मणिं दर्शयति ।)

सह गृहीत्वा अकलुषो नाम गन्धमादनकच्छोऽध्यासितः । कृता च स्थितिः ।

१ या किल स्त्री इमं देशमागमिष्यति सा लताभावेन परिणता भविष्यति । कृतश्च शापान्तो गौरीचरणरागसंभवं मणिं वर्जयित्वा लताभावं न मोक्ष्यतीति । ततोऽहं गुरुशापसंमूढहृदया विस्मृतदेवतानियमा स्त्रीजनपरिहरणीयं कुमारवनं प्रविष्टा । प्रवेशानन्तरं च काननोपान्तवर्तिलताभावेन परिणतं मे रूपम् ।

स्थितिः । [illegible] उर्वशी । या किल स्त्री इमं देशमागमिष्यति [illegible] परिणता भविष्यति । कृतश्च शापान्तो [illegible] । [illegible]

उर्वशी—कधं संगमणीओ अअं मणी । अदो एव्व महाराएण आलिङ्गिदा ज्जेव पदवत्थम्हि संवुत्ता ।

राजा—(ललाटे मणिं संनिवेश्य ।)

> स्फुरता विच्छुरितमिदं रागेण मणेर्ललाटनिहितस्य ।
> श्रियमुद्वहति मुखं ते बालातपरक्तकमलस्य ॥ ७२ ॥

उर्वशी—पिअंवद, महन्तो क्खु कालो अम्हाणं पइट्ठाणदो णिग्गदाणम् । कदाइ असूअन्ति पकिदिओ अम्हाणम् । ता एहि । गच्छम्ह ।

(इत्युत्तिष्ठतः ।)

राजा—यदाह भवती ।

उर्वशी—अध कध महाराओ गन्तुं इच्छदि ।

राजा—

> अचिरप्रभाविलसितैः पताकिना
>   सुरकार्मुकाभिनवचित्रशोभिना ।
> गमितेन खेलगमने विमानतां
>   नय मां नवेन वसतिं पयोमुचा ॥ ७३ ॥

१ कथं संगमनीयोऽयं मणिः । अत एव महाराजेनालिङ्गितैवैतदवस्थास्मि संवृत्ता ।

२ प्रियंवद, महान्खलु काल आवयोः प्रतिष्ठानान्निर्गतयोः । कदाचिद् सूयिष्यन्ति प्रकृतय आवाम् । तदेहि । गच्छाव ।

३ अथ कथं महाराजो गन्तुमिच्छति ।

एवंप्रकारकम् अनिर्वचनीयरूपमिति यावत् ॥ ७१ ॥ उर्वशी । कथं संगमनीयोऽयं मणिः । अत एव महाराजेनालिङ्गितैवैतदवस्थास्मि संवृत्ता ॥ उर्वशी । प्रियंवद महान्खलु काल आवयोः प्रतिष्ठानान्निर्गतयोः । कदाचिदसूयिष्यन्ति प्रकृतय आवाम् । तदेहि । गच्छाव । प्रतिष्ठानमिति प्रयागपूर्वतीरस्थितं पुरी ऐलवंशराजनगरम् ॥ उर्वशी । अथ कथं महाराजो गन्तुमिच्छति ॥ अचिरप्रभेति । हे खेलैव

(चर्चरी ।)

पाविअसहअरिसंगमओ पुलअपसाहिअअङ्गओ ।
सेच्छापत्तविमाणओ विहरइ हंसजुआणओ ॥ ७५ ॥

(इति सपरिवारो निष्क्रान्तो राजा ।)

चतुर्थोऽङ्कः ।

१ प्राप्तसहचरीसंगमः पुलकप्रसाधिताङ्गः ।
स्वेच्छाप्राप्तविमानो विहरति हंसयुवा ॥

मने अचिरप्रभा विद्युत्ताद्विलसिते येनुमता । सुरकार्मुकमेवाभिनवं नूतनं चि-
त्रमाहेक्य तेन शोभमानेन । 'आखेडलचापमयोधितम्' इति त्रिकाण्डी । वि
मानत्व प्रापितेन समायेनेति शेष । नूतनेन मेघेन मां पुरं प्रापय ॥ ७६ ॥
इवान्यापदेशेनाह—पाविअेति । प्राप्तसहचरीसंगम पुलकप्रसाधिताङ्गः । स्वे
च्छाप्राप्तविमानो विहरति हंसयुवा ॥ प्रसाधित भूषितम् । स्वेच्छयैव प्राप्तं वि
मानं यान येन । स्वेच्छया विहरतीत्यर्थः । यद्वा स्वेच्छया ईश्वरेच्छया प्राप्तो
विशिष्टो मान प्रियावशीकारजनितमन्य सत्कारो येन । पक्षे अभिमतोपनीतस्यो
मवान ॥ ७४ ॥ सपरिवार इति । सपरिवारस्तथा नीतिपुरस्सर निष्क्रान्तः
निवर्त । तदग्रग च पूर्ववत् ॥

विदुषीविक्रमोर्वशीयानुर्थेऽङ्के यथामति ।
विविधाः रङ्गनाथेन सद्भि संतोष्यतामियम् ॥

इति श्रीमद्विक्रमकरमौलिनिपुणमौलिमण्डनरङ्गनाथसूरिविरचि-
तायां श्रीकालिदासकृतविक्रमोर्वशीयटीकायां चतुर्थोऽङ्कः ॥



पञ्चमोऽङ्कः ।

(ततः प्रविशति हृष्टो विदूषकः ।)

विदूषकः —ही ही भो, दिट्ठिआ चिरस्स कालस्स उव्वसी-सहाओ तत्तभवं राआ णन्दणवणप्पमुहेसु पदेसेसु विहरिअ पडिणिउत्तो। पविसिअ णअरं दाणीं सकज्जाणुसासणेण पइदिमण्डलं अणुरञ्जअन्तो रज्जं करेदि। असंताणत्तणं वज्जिअ से ण किंपि सोअणीअम् । अज्ज तिहिविसेसो त्ति भअवदीणं गङ्गाजउणाणं संगमे देवीए सह किदाहिसेओ संपदं उवआरिअं उवविट्ठो । ता जाव अलंकरणीअमाणस्स अणुलेवणमल्लभाई भादुओ विअ होमि। (इति परिक्रामति ।)

(नेपथ्ये ।)

हद्धी हद्धी । एसो तालवेन्तपिधाणं णिक्खिविअ णीअमाणो

१ ही ही भो, दिष्ट्या चिरस्य कालस्योर्वशीसहायस्तत्रभवान्राजा नन्दनवनप्रमुखेषु प्रदेशेषु विहृत्य प्रतिनिवृत्तः । प्रविश्य नगरमिदानीं स्वकार्यानुशासनेन प्रकृतिमण्डलमनुरञ्जयन्राज्यं करोति । असंतानत्वं वर्जयित्वास्य न किमपि शोचनीयम् । अद्य तिथिविशेष इति भगवत्यो र्गङ्गायमुनयोः संगमे देव्या सह कृताभिषेकः सांप्रतमुपकार्यामुपविष्टः । तद्यावदलंक्रियमाणस्यानुलेपनमाल्यभागी भ्रातेव भवामि ।

२ हा धिक् हा धिक् । एष तालवृन्तपिधानं निक्षिप्य नीयमा

इदानीं विदूषकमुखेनाभिमतार्थोपक्षेपार्थं तत्प्रवेशमाह—तत इति । उर्वशी सहितत्वादागमनतो हृष्टः ॥ विदूषक । ही ही भो इत्याश्चर्ये । दिष्ट्या चिरस्य कालात् । चिरस्येत्यव्ययम् । उर्वशीसहायस्तत्रभवान्राजा नन्दनवनप्रमुखेषु प्रदेशेषु विहृत्य प्रतिनिवृत्तः । प्रविश्य नगरमिदानीं स्वकार्यानुशासनेन प्रकृतिमण्डलमनुरञ्जयन्राज्यं करोति । असंतानत्वं वर्जयित्वास्य न किमपि शोचनीयम्। तिथिविशेष इति भगवत्योर्गङ्गायमुनयोः संगमे देव्या सह कृताभिषेकः ■ सुपकार्यामुपविष्टः । अलंकृतमुपविष्ट इत्यपि पाठः । तद्यावदलंक्रियमाणस्यानुलेपनमाल्यभागी भ्रातेव भवामि । तिथिविशेषो [illegible] । [illegible] [illegible] । उपकार्यामिति [illegible] । प्राकृते [illegible] इत्यभिधानात् [illegible] । पविट्ठो इति पाठे तु मुख्य एवार्थः । उपकारिका इति [illegible] ॥ नेपथ्य इति । चूडिकार्थसूचनाकृतिरेषम् । ■ [illegible] । हा धिक् हा धिक् एष तालवृन्तपिधानं निक्षिप्य नी

अच्छाराविरहिदेण मोलिरअणदाए योइदो मणी आमिससङ्किणा गिद्धेण आक्खित्तो ।

विदूषक:—(आकर्ण्य ।) अच्चाहिदं अच्चाहिदम् । परमबहुमदो क्खु तव वअस्सस्स सगमणीओ णाम चूडामणी । अदो क्खु असमत्तणेवत्थो एव्व तत्तभव आसणादो उट्ठिदो । ता पासपरिवत्ती होमि । (इति निष्क्रान्त ।)

प्रवेशक ।

(तत प्रविशति राजा सूतश्च कञ्चुकिवेषकौ परिजनश्च ।)

राजा—वेधक वेधक,

आत्मनो वधमाहर्ता क्वासौ विहगतस्कर ।
येन तत्प्रथम स्तेयं गोप्तुरेव गृहे कृतम् ॥ १ ॥

किरातः—एसो अग्गमुहलग्गहेमसुत्तेण मणिणा अणुरञ्जअन्तो विअ आआसं भमदि ।

नोऽप्सरोविरहितेन मौलिरत्नतायां योजितो मणिरामिषशङ्किना गृध्रेणाक्षिप्त ।

१ अत्याहितमत्याहितम् । परमबहुमत खलु तव वयस्य सगमनीयो नाम चूडामणि । अत एवासमाप्तनेपथ्य एव तत्रभवानासनादुत्थितः । तत्पार्श्वपरिवर्ती भवामि ।

२ एषोऽग्रमुखलग्नहेमसूत्रेण मणिनानुरञ्जयन्निवाकाशं भ्रमति ।

रोविरहितेन अथ द्रुत्वा मौलिरत्नतायां योजितो मणिरामिषशङ्किना गृध्रेणाक्षिप्त । अत्यन्त तात्पर्यनकम् इति त्रिकाण्डी ॥ विदूषकः । अत्याहितमत्याहितम् । अत्याहितं महाभीतिः कर्म जीवानपेक्षि च' इति त्रिकाण्डी । परमबहुमत खलु तव वयस्य संगमनीयो नाम चूडामणि । अत एवासमाप्तनेपथ्य एव तत्रभवानासनादुत्थित । तस्मात्पार्श्ववर्ती भवामि । प्रवेशक इति लक्षणमुक्तम् । वधक इति किरातम । वधकर्तृक इत्यर्थ ॥ आत्मनो वधमाहर्तेति । तस्करः तत्प्रथममाप्तम् । गोप्तु रक्षकस्य ॥ १ ॥ किरातः । एषोऽग्रमुखलग्नहेमसूत्रेण मणिनानुरञ्जयन्निवाकाशं भ्रमति । 'मुखकोटिलग्न- १

राजा—पश्याम्येनम् ।

असौ मुखालम्बितहेमसूत्रं
बिभ्रन्मणिं मण्डलशीघ्रचारः ।
अलातचक्रप्रतिमं विहङ्ग-
स्तद्रागलेखावलयं तनोति ॥ २ ॥

कथय । किं त्वत्र कर्तव्यम् ।

विदूषकः—(उपेत्य ।) भो, अलं एत्थ घिणाए । अवराही सासणीओ ।

राजा—सम्यगाह भवान् । धनुर्धनुस्तावत् ।

परिजनः—जं भट्टा आणवेदि । (इति निष्क्रान्तः ।)

राजा—न दृश्यते हि विहगाधमः ।

विदूषकः—इदो इदो दक्खिणन्तरेण चलिदो सउणिहदासो ।

राजा—(दृष्ट्वा ।) इदानीं

प्रभापल्लवितेनायं करोति मणिना खगः ।
अशोकस्तबकेनेव दिङ्मुखस्यावतंसकम् ॥ ३ ॥

यवनी—(धनुर्हस्ता प्रविश्य ।) भट्टा, एदं ससरं चावम् ।

---

१ भो, अलमत्र घृणया । अपराधी शासनीयः ।
२ यद्भर्ताज्ञापयति ।
३ इत इतो दक्षिणान्तरेण चलितः शकुनिहताशः ।
४ भर्तः इदं सशरं चापम् ।

[illegible] च । असमुखेलत्र गुलम्बेति पूर्वं [illegible] ॥ असा विति । मण्डलशीघ्रचारमध्ये [illegible] । [illegible] म् । तत्प्रतिम ताटङ्कम् । तस्य मध्ये रागरेखा [illegible] मण्डलम् ॥ २ ॥ विदूषकः । भो, अलमत्र घृणया । अपराधी शासनीय ॥ परिजनः । यद्भर्ताज्ञापयति ॥ विदूषकः । इत इतो दक्षिणान्तरेण चलितः शकुनिहताश ॥ प्रभेति । प्रभया [illegible] ॥ ३ ॥ [illegible]

राजा—किमिदानीं धनुषा । बाणपथातीतः क्रव्यभोजनः । तथाहि ।

आभाति मणिविशेषो दूरमिदानीं पतत्रिणा नीतः ।
नक्तमिव लोहिताङ्गः परुषघनच्छेदसंपृक्तः ॥ ४ ॥

आर्य लातव्य ।

कञ्चुकी—आज्ञापयतु देवः ।

राजा—मद्वचनादुच्यन्तां नागरिकाः सायं निवासवृक्षाग्रे विचीयतां विहगाधमः ।

कञ्चुकी—यथाज्ञापयति देवः । (इति निष्क्रान्तः ।)

विदूषकः—भो, विस्समीअदु भवं संपदम् । कहिं गदो सो रअणलुम्पओ भवादो सासणादो मुच्चिस्सदि ।

(इत्युपविशतः ।)

राजा—वयस्य,

रत्नमिति न मे तस्मिन्मणौ प्रयासो निहतमोरिपुसे ।
प्रियया तेनास्मि सखे संगमनीयेन संगमितः ॥ ५ ॥
(ततः प्रविशति सशरं मणिमादाय कञ्चुकी ।)

कञ्चुकी—जयति जयति देवः ।

अनेन निर्भिन्नतनुः स वध्यो ।
रोषेण ते मार्गणतां गतेन

१ भो, विश्राम्यतु भवान्साम्प्रतम् । कुत्र गतः स रत्नलुम्पकः भवतः शासनान्मोक्ष्यते ।

विचेतव्यः ॥ आभातीति । मणिविशेषः उत्कृष्टो मणिः । लोहिताङ्गो मङ्गलः । लोहिताङ्गो महीसुत इति च । परुषघनच्छेदः परिचितमेघखण्डः ॥ ४ ॥ लातव्य इति कञ्चुकिनाम । तदुक्तमुपरि ॥ विदूषकः । भो विश्राम्यतु भवान्साम्प्रतम् । कुत्र गतः स रत्नलुम्पको भवतः शासनान्मोक्ष्यते । 'लुम्पो स्तेयः' ... इति कोशः ॥ रत्नमिति मेति । निहतपक्षिणि विहगाधमे । संगमनीयेन तन्नाम्ना । संगमितः योजितः ॥ ५ ॥ अनेनेति । निर्भिन्नतनुर्विदारितशरीरः । रोषेण ते तव । मार्गणतां गतेन

धामापराधोचितमन्तरीक्षा
समौलिरत्न पतित पतत्री ॥ ६ ॥

(सर्वे विस्मयं रूपयन्ति ।)

कञ्चुकी—अभिम्पालितोऽयं मणि कस्मै प्रदीयताम् ।

राजा—किरात, गच्छ । कोशपेटके स्थापयैनम् ।

किरातः—'जं भट्टा आणवेदित्ति । (इति मणिमादाय निष्क्रान्तः ।)

राजा—(बाणम् दृष्ट्वा ।) आर्य, जानाति भवान्कस्यायं बाण इति ।

कञ्चुकी—नामाङ्कितो दृश्यते । नात्र मे वर्णविभावसहा दृष्टि ।

राजा—तदुपश्लेषय शरं यावन्निरूपयामि ।

विदूषकः—किं भवं विआरेदि ।

राजा—शृणु तावत्प्रहर्तुर्नामाक्षराणि ।

विदूषकः—अवहिदो म्हि ।

राजा—(वाचयति ।)

उर्वशीसंभवस्यायमैलसूनोर्धनुष्मतः ।
कुमारस्यायुषो बाण संहर्ता द्विषदायुषाम् ॥ ७ ॥

विदूषकः—दिट्ठिआ संताणेण वड्ढदि महाराओ ।

१ यद्भर्ताज्ञापयतीति ।
२ किं भवान् विचारयति ।
३ अवहितोऽस्मि ।
४ दिष्ट्या संतानेन वर्धते महाराजः ।

धामापराधोचितमन्तरीक्षात् ... शासननिरतत्वात् ॥ ६ ॥
... कोशपेटके ... स्थापय । किरात । यद्भर्ता ... निरूपयामीति भविष्यदर्थ ॥
विदूषक । किं भवान् विचारयति ॥ विदूषक । अवहितोऽस्मि ॥ उर्व-
... पुरूरवस सूनो पुत्रस्य । आयुर्नामकस्य कुमारस्य । ...
... आयुष । एकाविनाशम् ॥ ॥ विदूषकः । दिष्ट्या संतानेन वर्धते

राजा—कथमेतत् । सखे, अनिमिषया वियुक्तोऽहमुर्वश्या । न कदाचिदपि तत्रभवती गर्भोद्भिन्नतदोहदाप्युपलक्षिता । कुत एव प्रसूतिः । किं तु

आविलपयोधराग्रं लवलीदलपाण्डुराननच्छायम् ।
कतिचिदहनि शरीरं श्लथवलयमिवाभवत्तस्याः ॥ ८ ॥

विदूषकः—मा भवं माणुसीधम्मं दिव्वाए ताए संभावेदु । पभावगूढाइं ताणं चरिदाइं ।

राजा—अस्तु तावदेवं यथाह भवान् । पुत्रसंवरणे किमिव कारणं तत्रभवत्याः ।

विदूषकः—मा वुड्ढं मं राजा परिहरिस्सदि त्ति ।

राजा—हत परिहासेन । चिन्त्यताम् ।

विदूषकः—को देवरहस्साइं तक्कइस्सदि ।

कञ्चुकी—(प्रविश्य ।) जयति जयति देवः । देव, च्यवनाश्रमात्कुमारं गृहीत्वा तापसी संप्राप्ता देवं द्रष्टुमिच्छति ।

राजा—उभयमप्यविलम्बितं प्रवेशय ।

कञ्चुकी—यदाज्ञापयति देवः । (इति निष्क्रम्य तापसीसहितं कुमारमादाय प्रविष्टः ।)

---

१ मा भवान्मानुषीधर्मं दिव्यायास्तस्याः संभावयतु । प्रभावगूढानि तासां चरितानि ।

२ मा वृद्धो मां राजा परिहरिष्यतीति ।

३ को देवरहस्यानि तर्कयिष्यति ।

राजा । निरुत्साहानन्दन इति सागर ॥ अनिमिषी देववनिता । अन्यत्र नैमिषेयमग्रात् इत्यपि क्वचित्पाठः । सत्रमाच्छादने यज्ञे सदादाने वनेऽपि च इति कोषः ॥ आविलेति । आविलं मलिनम् । लवली लताविशेषः । ग्रामेति केचित् । आननं मुखम् । आनीलचूचुकाग्रम् इत्यपि पाठः । चूचुकं तु कुचाग्रं स्यात् इत्यमरः ॥ ८ ॥ विदूषक । मा भवान्मानुषीधर्मं दिव्यायास्तस्याः संभावयतु । प्रभावगूढानि तासां चरितानि ॥ संवरणं गोपनम् ॥ विदूषकः । मा वृद्धो मां राजा परिहरिष्यतीति ॥ विदूषकः । को देवरहस्यानि तर्कयिष्यति ॥ उभयम् । कुमा

विदूषकः —[1]ण क्खु एसो खत्तिअकुमारो जस्स णामाङ्किदो गिद्धलक्खवेदी णाराओ उवलद्धो तत्तभवदो बहु अणुकरेदि ।

राजा—एवमेतत् ।

> बाष्पायते निपतिता मम दृष्टिरस्मि-
> न्वात्सल्यबन्धि हृदयं मनसः प्रसादः ।
> संजातवेपथुभिरुज्झितधैर्यवृत्ति-
> रिच्छामि चैनमदयं परिरब्धुमङ्गैः ॥ ९ ॥

कञ्चुकी—भगवति, एवं स्थीयताम् ।

(तापसीकुमारौ यथोचितं स्थितौ ।)

राजा—(उपसृत्य ।) भगवति, अभिवादये ।

तापसी—[2]महाराअ, सोमवंसधारअन्तो होहि । (आत्मगतम् ।) भो, अणाचक्खिदो वि विण्णादो एव्व एसो राएसिणो ओरसो संबन्धो । (प्रकाशम् ।) जाद, पणम गुरुम् ।

(कुमारो बाणगर्भमञ्जलिं बद्ध्वा प्रणमति ।)

राजा—वत्स, आयुष्मान्भव ।

कुमारः —(स्पर्शं रूपयित्वा । स्वगतम् ।)

> यदि हार्दमिदं श्रुत्वा पिता ममायं सुतोऽहमस्येति ।
> उत्सङ्गे वृद्धानां गुरुषु भवेत्कीदृशः स्नेहः ॥ १० ॥

---

१ ननु खल्वेष क्षत्रियकुमारो यस्य नामाङ्कितो गृध्रलक्ष्यवेधी नाराच उपलब्धस्तत्रभवतो बह्वनुकरोति ।

२ महाराज, सोमवंशधारको भव । भो, अनाख्यातोऽपि विज्ञात एव तस्य राजर्षेरौरसः संबन्धः । जात, प्रणम गुरुम् ।

[illegible] । विदूषक इति । ननु खल्वेष क्षत्रियकुमारो यस्य नामाङ्कितो गृध्रलक्ष्यवेधी नाराच उपलब्धः । नाराचो बाणः । तत्रभवतो बह्वनुकरोति । तत्र भवान् पूज्यस्य । बाष्पायत इति । निपतितेति । बाष्पमुद्वमति बाष्पायते अश्रुसंभृता भवति । वात्सल्यबन्धि ममातिशयप्रेम । वेपथुः कम्पः । परिरब्धुमालिङ्गितुम् ॥९॥ तापसी । महाराज सोमवंशधारको भव । भो अनाख्यातोऽपि विज्ञात एव तस्य राजर्षेरौरसः संबन्धः । जात प्रणम गुरुम् । [illegible] । [illegible] ॥ यदि हार्दमिति । अयं मम जनयिता । अहमस्य सुत पुत्र इति श्रुत्वा यदि

[illegible]

राजा—ततस्ततः ।

तापसी—तदो उवलद्धविज्जेण तेण भअवदा च्यवणेण अहं समादिट्ठा णिज्जादेहि एदं उव्वसीहत्थे णासं त्ति । ता उव्वसिं पेक्खिदुं इच्छामि ।

राजा—तेन ह्यासनमनुगृह्णातु भगवती ।

(विष्कोपनीतवेत्रासनोपविष्टा ।)

राजा—लातव्य, आहूयतामुर्वशी ।

कञ्चुकी—यदाज्ञापयति देवः । (इति निष्क्रान्तः ।)

राजा—(कुमारमवलोक्य ।) एह्येहि वत्स ।

सर्वाङ्गीणः स्पर्शः सुतस्य किल तेन मामुपगतेन ।
आह्लादयस्व तावच्चन्द्रकरश्चन्द्रकान्तमिव ॥ ११ ॥

तापसी—जाद, णन्देहि पिदरं ।

(कुमारो राजानमुपसर्पति ।)

राजा—(आलिङ्ग्य ।) वत्स, प्रियसखं ब्राह्मणमशङ्कितो वन्दस्व ।

विदूषकः—किं त्ति सङ्किस्सदि । ण अस्समवासपरिचिदो एव्व साहामिओ ।

---

१ तत उपलब्धविद्येन तेन भगवता च्यवनेनाहं समादिष्टा निर्यातयैनमुर्वशीहस्ते न्यासमिति । तदुर्वशीं प्रेक्षितुमिच्छामि ।

२ जात, नन्दय पितरम् ।

३ किमिति शङ्किष्यते । ननु आश्रमवासपरिचित एव शाखामृगः ।

द्रुमशिखरे निलीयमानो न पीडितो बाणस्य ॥ तापसी । तत उपलब्धविद्येन तेन भगवता च्यवनेनाहं समादिष्टा निर्यातयैनमुर्वशीहस्ते न्यासमिति । निर्यातनं न्यासप्रत्यर्पणम् । 'दाने न्यासार्पणे वैरशुद्धौ निर्यातनं मतम्' इति मुक्तावली । न्यासो निक्षेपः । तदुर्वशीं प्रेक्षितुमिच्छामि ॥ सर्वाङ्गीण इति । किले ति हेतौ । सर्वाङ्गीणः सर्वाङ्गव्यापी । उपगतेन प्राप्तेन । तेन स्पर्शेन । 'दूरगतेन स्पर्शेऽपि चन्द्रस्पर्श एव ॥ ११ ॥ तापसी । जात नन्दय पितरम् ॥ विदूषकः । किमिति शङ्किष्यते । ननु आश्रमवासपरिचित एव शाखामृगः । आश्रम एवाश्रा

कुमारः—(सविनयम् ।) तात, वन्दे ।

विदूषकः—सोत्थि भवदो । वड्ढदु भवम् ।

(ततः प्रविशत्युर्वशी कञ्चुकी च ।)

कञ्चुकी—इत इतो देवी ।

उर्वशी—(प्रविश्यावलोक्य च ।) को णु क्खु एसो कणअपीठोव विट्ठो महाराएण सज्जीअमाणसिहण्डो चिट्ठदि । (तापसीं दृष्ट्वा ।) अम्महे, सच्चवदीसहिदो पुत्तओ मे आऊ महन्तो क्खु संवुत्तो

राजा—(विलोक्य ।) वत्स,

इयं ते जननी प्राप्ता त्वदालोकनतत्परा ।
स्नेहप्रस्रवनिर्भिन्नमुद्वहन्ती स्तनांशुकम् ॥ १२ ॥

तापसी—जाद, एहि । पच्चुवगच्छ मादरम् ।

(इति कुमारेण सहोर्वशीमुपसर्पति ।)

उर्वशी—अज्जे, पादवन्दणं करेमि ।

---

१ स्वस्ति भवते । वर्धतां भवान् ।

२ को नु खल्वेष कनकपीठोपविष्टो महाराजेन सज्ज्यमानशिखण्ड स्तिष्ठति । अहो, सत्यवतीसहितः पुत्रको मे आयुः महान् खलु संवृत्तः ।

३ जात, एहि । प्रत्युपगच्छ मातरम् ।

४ आर्ये, पादवन्दनं करोमि ।

वस्थिस्सा कृतचिरमैत्रीक इत्यर्थः ॥ विदूषकः । स्वस्ति भवते । वर्धतां भवान् । उर्वशी । को नु खल्वेष कनकपीठोपविष्टो महाराजेन सज्ज्यमानशिखण्डस्तिष्ठति । शिखण्डश्चूडा । शिखण्डो बर्हचूडयो इति मुक्तावली । अम्महे आश्चर्ये । सत्यवतीसहितः पुत्रको मे आयुः । महान्खलु संवृत्तः ॥ इयमिति । आलोकनतत्परा विलोकनैकताना । स्नेहेन प्रेम्णा प्रस्रवः क्षरत्पयः । तेन नितरां भिन्नं संगतम् । आर्द्रीभूतमिति यावत् । स्नेहप्रसर—इति पाठे स्नेहस्य प्रसरो रोमाङ्कुरस्वेदादिद्वारा आधिक्यम् । 'प्रस्रव' इति पाठे स्नेहप्रस्रव अर्थात्स्वेदोद्गमः । भिन्नं बाष्पवदस्यर्थं दारिते संगते स्फुटे इति लोचन ॥ १२ ॥ तापसी । जात, एहि प्रत्युपगच्छ मातरम् ॥ उर्वशी । आर्ये, पादवन्दनं करोमि ॥ तापसी ।

तापसी—वच्छे, भत्तुणो बहुमदा होहि ।

कुमार —अम्ब, अभिवादये ।

उर्वशी—वच्छ, पिदरं आराधयन्तो होहि । (राजानं प्रति ।) जेदु जेदु महाराओ ।

राजा—स्वागतं पुत्रवत्यै । इत आस्यताम् ।

उर्वशी—अज्जा, उवविसध ।

(सर्वे यथोचितमुपविष्टाः ।)

तापसी—वच्छे, गहीदविज्जो आऊ संपदं कवचारुहो संवुत्तो । एसो भत्तुणो समक्खं णिज्जादिदो सहिहत्थणिक्खेवो । ता तुम्हेहिं विसज्जिदं अत्ताणं इच्छामि । उवरुज्झइ मे अस्समधम्मो ।

उर्वशी—काम चिरस्स अज्जउत्तं पेक्खिअ अवहिदहिअएण जुज्जदि पुणो अस्समधम्मं विभाविदुम् । ता गच्छदु अज्जा पुणो दंसणाअ ।

---

१ वत्से, भर्तुर्बहुमता भव ।

२ वत्स, पितरमाराधयन्भव । जयतु जयतु महाराजः ।

३ आर्या, उपविशत ।

४ वत्से, गृहीतविद्य आयुः साम्प्रतं कवचार्हः संवृत्तः । एष भर्तुः समक्षं निर्यातितः सखीहस्तनिक्षेपः । तद्युष्माभिर्विसर्जितमात्मानमिच्छामि । उपरुध्यते मे आश्रमधर्मः ।

५ कामं चिरस्यार्यपुत्रं प्रेक्ष्यावहितहृदयेन युज्यते पुनराश्रमधर्मं विभावयितुम् । तद्गच्छत्वार्या पुनर्दर्शनाय ।

वत्से भर्तुर्बहुमता भव ॥ उर्वशी । वत्स, पितरमाराधयन्भव । जयतु जयतु महाराज ॥ उर्वशी । आर्याः उपविशत ॥ तापसी । वत्से गृहीतविद्य आयुः साम्प्रतं कवचार्हः संवृत्तः । कवचहर इत्यपि पाठः । एष भर्तुः समक्षं निर्यातितः सखीहस्तनिक्षेपः । तद्युष्माभिर्विसर्जितमात्मानमिच्छामि ॥ उपरुध्यते मे आश्रमधर्मः । अपराध्यति इत्यपि पाठः ॥ उर्वशी । काम चिरस्यार्यपुत्र प्रेक्ष्यावहितहृदयेन युज्यते पुनराश्रमधर्मं विभावयितुम् । तद्गच्छत्वार्या पुनर्दर्श

राजा—आर्ये, वनगमने च्यवनाय मम प्रणाममावेदयिष्यसि ।

तापसी—एव्वं भोदु ।

कुमारः—आर्ये, सत्यमेव निवर्तनम् । इतो मामपि नेतुमर्हसि ।

राजा—अयि वत्स, उषितं त्वया पूर्वस्मिन्नाश्रमे । द्वितीयम ध्यासितुं तव समयः ।

तापसी—जाद, गुरुणो वअणं अणुचिट्ठ ।

कुमारः—तेन हि

य सुप्तवान्मदङ्के शिखण्डकण्डूयनोपलब्धसुखः ।
तं मे जातकलापं प्रेषय मणिकण्ठकं शिखिनम् ॥ १३ ॥

तापसी—एव्वं करेमि ।

उर्वशी—भअवदि, पादवन्दणं करेमि ।

राजा—भगवति, प्रणमामि ।

तापसी—सोत्थि भोदु तुम्हाणम् । (इति निष्क्रान्ता ।)

राजा—सुन्दरि,

अद्याहं पुत्रिणामग्र्यः सुपुत्रेण त्वयामुना ।
पौलोमीसमवेतेन जयन्तेन पुरंदरः ॥ १४ ॥

---

१ एवं भवतु ।
२ जात, गुरोर्वचनमनुतिष्ठ ।
३ एवं करोमि ।
४ भगवति, पादवन्दनं करोमि ।
५ स्वस्ति भवतु युष्मभ्यम् ।

वाय । 'काम चिरस्य प्रेष्य विरहोत्कण्ठितासि न पुनर्धमावरोधे वर्तितुम्' इत्यपि क्वचित्पाठः ॥ तापसी । एवं भवतु ॥ उषितं स्थितम् । पूर्वस्मिन्नाश्रमे ब्रह्मचर्याख्ये । द्वितीयो गार्हस्थ्याश्रमः ॥ तापसी । जात, गुरोर्वचनमनुतिष्ठ । य सुप्तवानिति । सुप्तवान्निद्रां चकार । यद्वा सुप्त स्वापो विद्यतेऽस्येति ता रः । जातकलापमुद्गतपिच्छभारम् । कलापः संहते बर्हे काञ्च्यादौ तूणके द्वयोः' इति मुक्तावली । शितिकण्ठकं नीलग्रीवं वर्तमानं वा ॥ १३ ॥ तापसी । एवं करोमि ॥ उर्वशी । भगवति, पादवन्दनं करोमि ॥ तापसी । स्वस्ति भवतु युष्मभ्यम् ॥ अद्याहमिति । पुत्रिणां पुत्रवतामग्र्यः श्रेष्ठः पौलोमी

(उर्वशी रुदती रोदिति ।)

विदूषक—किं णु खु संपदं अत्तभोदी असुमुही संवुत्ता ।

राजा—(सास्रम् ।)

किं सुन्दरि प्रहर्षितासि ममोपनीते
वंशस्थितेरधिगमात्प्रमहति प्रमोदे ।
पीनस्तनोपरिनिपातिभिरश्रुबिन्दु-
र्मुक्तावलीविरचनां पुनरुक्तयन्ती ॥ १५ ॥

उर्वशी—सुणादु महाराओ । पढमं उण पुत्तदंसणसमुत्थिदेण आणन्देण विसुमरिदम्हि । दाणीं महिन्दसंकित्तणेण मम हिअए ट्ठिद समएण ।

राजा—श्रूयतां समयः ।

उर्वशी—अहं पुरा महाराअगहिदहिअआ गुरुसावसंमूढा महि-न्देण अवधीकदुअ अब्भणुण्णादा ।

१ किं नु खलु साम्प्रतमत्रभवत्यश्रुमुखी संवृत्ता ।

२ शृणोतु महाराजः । प्रथमं पुनः पुत्रदर्शनसमुत्थितेनानन्देन विस्मृतास्मि । इदानीं महेन्द्रसंकीर्तनेन मम हृदये स्थितं समयेन ।

३ अहं पुरा महाराजगृहीतहृदया गुरुशापसंमूढा महेन्द्रेणावधीकृत्याभ्यनुज्ञाता ।

दाणी । अथ च इन्द्रमुख ॥ १४ ॥ विदूषक । किं नु खलु साम्प्रतमत्रभवत्यश्रुमुखी संवृत्ता । साम्प्रतमित्यत्र एकपदे इति पाठः । एकपदे तत्क्षणे । तत्क्षणैकपदं तुल्ये सद्यः सपदि च स्मृतम् इति हलायुधः ॥ किं सुन्दरीति । प्रदर्शिता हर्षरोदना । वंशस्य कुलस्य स्थितिर्व्यवस्थानं यस्मात्तादृशस्य पुत्रस्याधिगमात्प्राप्ते कुलवस्थानप्राप्तवा । वंशो वेणौ कुले वर्गे पृष्ठस्यावयवे स्मृत । नानार्थविवरदादपि भाषाभाष्यान्तरेऽपि च ॥ इति श्रीधरसेनः । मर्यादायामवस्थाने स्थाने दीप्तनि च स्थितिः इति विश्वलोचनः । प्रहर्षिते प्रकाशमाने । प्रमोदे संतोषे । उपनीत इव सति । महति इति क्वचित्पाठः । महति वृहणे । पुनरुक्तमिति क्रियाविशेषणम् । विरचनम् इति पाठे तद्विशेषणम् । अश्रुबिन्दुभिः । अश्रमश्रु च (शोणितम्) इति त्रिकाण्डी ॥ १५ ॥ उर्वशी । शृणोतु महाराज । प्रथम पुनः पुत्रदर्शनसमुत्थितेनानन्देन विस्मृतास्मि । इदानीं महेन्द्रसंकीर्तनेन मम हृदये स्थित समयेन । समयेनावधिः कालेन । समयाः शपथाचारकालसिद्धान्तसंविदः इति त्रिकाण्डी ॥ उर्वशी ।

राजा—किमिति ।

उर्वशी—[1]जदा मम सो पिअवअस्सो तुइ समुप्पण्णदस्सं मुहं पेक्खदि तदा मम समीवं तुए आअन्तव्वं त्ति । तदो मए महाराअविओअभीरुदाए जादमेत्तो एव्व विज्जागमणिमित्तं अ भअवदो चवणस्स अस्समपदे एसो पुत्तओ अज्जाए सच्चवदीए हत्थे अप्पणा णिक्खित्तो । अज्ज उण पिदुणो आराहणसमत्थो संवुत्तो त्ति काउण णिज्जादिदो एसो दीहाऊ आऊ । एत्तिओ मे महाराएण सह संवासो ।

(सर्वे विषादं नाटयन्ति । राजा मोहमुपगच्छति ।)

सर्वे—[2]समस्ससदु समस्ससदु महाराओ ।

कञ्चुकी—समाश्वसितु महाराज ।

विदूषकः—[3]अच्चाहिदं अच्चाहिदम् ।

---

१ यदा मम स प्रियवयस्यस्त्वयि समुत्पन्नगुणं मुखं प्रेक्षते तदा मम समीपं त्वयागन्तव्यमिति । तदा मया महाराजवियोगभीरुतया जातमात्र एव विद्यागमनिमित्तं च भगवतश्च्यवनस्याश्रमपदे एष पुत्रक आर्यायाः सत्यवत्या हस्ते आत्मना निक्षिप्तः । अद्य पुनः पितुराराधनसमर्थः संवृत्त इति कृत्वा निर्यातित एष दीर्घायुरायुः । एतावान्मम महाराजेन सह वासः ।

२ समाश्वसितु समाश्वसितु महाराजः ।

३ अत्याहितमत्याहितम् ।

[illegible] उर्वशी । यदा मम स प्रियवयस्यस्त्वयि समुत्पन्नगुणं मुखं प्रेक्षते तदा मम समीपं [illegible] । तदा मया महाराजवियोगभीरुतया [illegible] एव विद्यागमनिमित्तं च भगवतश्च्यवनस्याश्रमपदे एष पुत्रक आर्यायाः सत्यवत्या हस्ते आत्मना निक्षिप्तः । अद्य पुनः पितुराराधनसमर्थः संवृत्त इति कृत्वा निर्यातित एष दीर्घायुरायुः । [illegible] [illegible] । समाश्वसितु [illegible] विदूषकः । [illegible] इति [illegible]

राजा—(समाश्वस्य ।) अहो, सुखप्रत्यर्थिना दैवस्य ।

आश्वासितस्य मम नाम सुतोपलब्ध्या
सद्यस्त्वया सह कृशोदरि विप्रयोगः ।
व्यावर्तितातपरुजः प्रथमाभ्रवृष्ट्या
वृक्षस्य वैद्युत इवाग्निरुपस्थितोऽयम् ॥ १६ ॥

विदूषकः—[१]अअं सो अत्थो अणत्थाणुबन्धीति तक्केमि । संपदं भवदा वक्कल णेवत्थिअ तवोवणं गन्तव्वं त्ति ।

उर्वशी—[२]हा हदम्हि मन्दभाआ । मयि णिव्वुदिणअस्स पुत्तअस्स रज्जाणन्तरं सग्गारोहणेण अवसिदकज्जां विप्पओअपुदी महाराओ समत्थइस्सदि ।

राजा—सुन्दरि, मा मैवम् ।

नहि सुलभवियोगा कर्तुमात्मप्रियाणि
प्रभवति परवत्ता शासने तिष्ठ भर्तुः ।

---

१ अय सोऽर्थोऽनर्थानुबन्धीति तर्कयामि । सम्प्रति भवता वल्कलं नेपथ्य तपोवनं गन्तव्यमिति ।

२ हा हतास्मि मन्दभाग्या । मयि निर्वृतिनयस्य पुत्रस्य राज्यानन्तरं स्वर्गारोहणेनावसितकार्यां वियोगमुखीं महाराजः समर्थयिष्यति ।

सुखविरोधिना । प्रतिरोधिनाऽपि [illegible] इति [illegible] ॥ आश्वासितस्येति । सुतोपलब्ध्या सुतप्राप्त्या । नामेति प्रकाशे । [illegible] इति [illegible] । आश्वासितस्य [illegible] । विप्रयोगो वियोगः । व्यावर्तिता [illegible] । [illegible] इति [illegible] । [illegible] । प्रथमाभ्रस्य [illegible] । [illegible] । वैद्युतो विद्युत्सम्बन्धी ॥ १६ ॥ विदूषकः । अयं सोऽर्थोऽनर्थानुबन्धीति तर्कयामि । सम्प्रति भवता वल्कलं [illegible] । [illegible] ॥ उर्वशी । हा हतास्मि मन्दभाग्या । मयि [illegible] पुत्रस्य राज्यानन्तरं [illegible] वियोगमुखीं महाराजः समर्थयिष्यति । [illegible]

अहमपि तव सूनावद्य निन्यस्य राज्य
विचरितमृगयूथान्याश्रयिष्ये वनानि ॥ १७ ॥

कुमार'—नार्हति तातो नृपपुङ्गवधारिताया दम्य नियोजयितुम् ।

राजा—अयि वत्स, मा मैवम् ।

शमयति गजानन्यान्गन्धद्विप कलभोऽपि स
प्रभवतितरा वेगोदग्र भुजङ्गशिशोर्विषम् ।
भुवमधिपतिर्बालावस्थोऽप्यल परिरक्षितु
न खलु वयसा जात्यैवाय स्वकार्यसहो गण ॥ १८ ॥

आर्य लातव्य ।

कञ्चुकी—आज्ञापयतु देव ।

राजा—मद्वचनादमात्यपर्षद ब्रूहि, संभ्रियतामायुष्मतो राज्याभिषेक ।

(कञ्चुकी दु खेन निष्क्रान्त । सर्वे दृष्टिनिपात रूपयन्ति ।)

परवत्ता पराधीनता । परतन्त्र पराधीन परवान् इत्यमर । शासन आज्ञाश्म् । सूना पुत्र । सूनु पुत्रेऽनुजे रवौ इत्यनेकार्थे । विचरितानि इतस्ततमनानि मृगयूथानि मृगसमूहा येषु ॥ १७ ॥ नृपपुङ्गवो नृपश्रेष्ठ । 'महोक्षधारितायाम्' इत्यपि पाठ । दम्यवत्सतरौ समा इति त्रिकाण्डी ॥ शमयतीति । गन्धद्विपो गन्धगज कलभो बालो॰पि अन्यान्गजाञ्शमयति परिभवति । गन्धगजलक्षण च— यस्य गन्ध समाघ्राय न तिष्ठन्ति प्रतिद्विपा । स वै गन्धगजो नाम नृप तेर्विजयावह ॥ इति । यत भानोर्ऽोन नरश्रीर्मिन्द्रेनेग इति स्मृत वचनोक्त[illegible] न नृपम् । भुजङ्गशिशोर्विष [illegible] प्रभवति मारणसमर्थ भवति । धात [illegible] । उक्त [illegible]— [illegible]मनुष्याणि धातव इति । एव च [illegible] विषवेगा अपि भवन्ति । तत्र रूपाणि च विवन्त्वेव पृथक्पृथग्विकल्पितानि । [illegible] — [illegible] रचयति विषम भेदश्चोष्णाधो तम्योर्ध्वसारता दी [illegible] जनयन्ती वर्णभेदजाता । या वग पञ्चमो॰गो नयनविरक्तता कम्पक च हिक्का पता निश्वासमोहा चिन्तेति च मृति सप्तमो भ जुक्त्य ॥ इति । एव बालावस्थोऽप्यधिपती राजा भुव परिरक्षितुमल समर्थ खलु । यतोऽय गण तत्रादृगण समुदायो वयसा न स्यात्किन्तु स्वकार्यसहो निजकार्यकरणसमर्थो

राजा—(आकाशमवलोक्य।) कुतो नु खल्वयं विद्युत्संपातः। (निपुणमवलोक्य।) अये, भगवान्नारदः।

गोरोचनानिकषपिङ्गजटाकलापः
संलक्ष्यते शशिकलामलवीतसूत्रः।
मुक्तागुणातिशयसंभृतमण्डनश्री-
र्हेमप्ररोह इव जङ्गमकल्पवृक्षः॥ १९॥

अर्घोऽर्घस्तावत्।

उर्वशी—एअं भअवदो अग्घो।[1]

(ततः प्रविशति नारदः।)

नारदः—विजयतां विजयतां मध्यमलोकपालः।

राजा—भगवन्, अभिवादये।

उर्वशी—भअवं, पणमामि।[2]

नारदः—अविरहितौ दम्पती भूयास्ताम्।

राजा—(आत्मगतम्।) अपि नामैवं स्यात्। (प्रकाशम्। कुमारं परिष्वज्य।) वत्स, भगवन्तमभिवादयस्व।

कुमारः—भगवन्, और्वशेय आयुः प्रणमति।

नारदः—आयुष्मानेधि।

१ अयं भगवतोऽर्घः।
२ भगवन् प्रणमामि।

[illegible] ॥ १८ ॥ [illegible] गोरोचनेति। गोरोचनाया निकष [illegible] तस्या रेखा [illegible] पिङ्गो जटाकलापो जटासमूहो यस्य। [illegible] मुक्तागुणमौक्तिक [illegible] ॥ १९ ॥ उर्वशी। [illegible] इति विभाषा। [illegible] इति विभाषा [illegible]। उर्वशी। भगवन्, प्रणमामि [illegible]

राजा—अथ विहरोऽनुगृहीतम् ।

(नारदमुपवेशयति । सर्वे नारदमुपविशन्ति ।)

राजा—(सविनयम् ।) भगवन्, किमागमनप्रयोजनम् ।

नारदः—राजन्, श्रूयतां महेन्द्रसंदेशः ।

राजा—अवहितोऽस्मि ।

नारदः—प्रभावदर्शी मघवा वनगमनाय कृतबुद्धिं भवन्तमनुशास्ति ।

राजा—किमाज्ञापयति ।

नारदः—त्रिकालदर्शिभिर्मुनिभिरादिष्टः सुरासुरविमर्दो भावी । भवांश्च सांयुगीनः सहायो नः । तेन न त्वया शस्त्रसंन्यासः कार्यः । इयं चोर्वशी च यावदायुस्तव सहधर्मचारिणी भवत्विति ।

उर्वशी—(अपवार्य ।) हृदयादिव शल्यमपनीतम् ।

राजा—परमनुगृहीतोऽस्मि परमेश्वरेण ।

नारदः—युक्तम् ।

[illegible] कुर्यात् [illegible] ।

[illegible] ॥ २० ॥

[illegible]

[illegible]

रम्भा—अज्ज मे अहिसेअसमारो ।

नारद —उपवेश्यतामयमायुष्मान् भद्रपीठे ।

(रम्भा कुमारं भद्रपीठे उपवेशयति ।)

नारद —(कुमारस्य शिरसि कलशमावर्ज्य ।) रम्भे, निर्वर्त्यतामस्य शेषो विधिः ।

रम्भा—(प्रणामं निर्वर्त्य ।) वच्छ, पणम भअवन्द पिदरो अ ।

(कुमारः तथा प्रणमति ।)

नारद —स्वस्ति भवते ।

राजा—कुलधुरंधरो भव ।

उर्वशी—पिदुणो आराहओ होदि ।

(नेपथ्ये वैतालिकद्वयम् ।)

प्रथमः—विजयतां युवराजः ।

अमरमुनिरिवात्रिः सद्गुरुत्रेरिवेन्दु
र्बुध इव शिशिरांशोर्बोधनस्येव देव ।
भव पितुरनुरूपस्त्वं गुणैर्लोककान्तै
रतिशयिनि समस्ता वत्स पर्याशिषस्ते ॥ २१ ॥

१ अद्य मेऽभिषेकसमारः ।

२ वत्स प्रणम भगवन्तं पितरौ च ।

३ पितुराराधको भव ।

स्वाभिषेकसमारः । समारो विस्तर [illegible] ॥ भद्रपीठे इमाभिषेकासनम् । भद्रासनलक्षणं चाह [illegible]पुराणे— [illegible] [illegible]स च वा । भद्रासन प्रवनभ्य [illegible] ॥ [illegible] च [illegible] [illegible]ब्रह्मर्षिगाथा च— [illegible] इत्य पादाधिको [illegible] । [illegible] ॥ इति ॥ रम्भा । [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible]मपश्ये । प्रथमो वैतालिकः । अमरमुनिरिति । बोधनो बुधः । [illegible] इति पाठस्यार्थः स एव । [illegible] राजा । [illegible]

राजा—अथ विष्टरोऽनुगृह्यताम् ।

(नारदस्तथोपविष्टः । सर्वे नारदमनूपविशन्ति ।)

राजा—(सविनयम् ।) भगवन्, किमागमनप्रयोजनम् ।

नारदः—राजन्, श्रूयतां महेन्द्रसंदेशः ।

राजा—अवहितोऽस्मि ।

नारदः—प्रभावदर्शी मघवा वनगमनाय कृतबुद्धिं भवन्तमनुशास्ति ।

राजा—किमाज्ञापयति ।

नारदः—त्रिकालदर्शिभिरादिष्टः सुरासुरविमर्दो भावी । भवांश्च सांयुगीनः सहायः । तेन न त्वया शस्त्रन्यासः कर्तव्यः । इयं चोर्वशी यावदायुस्तव सहधर्मचारिणी भवत्विति ।

उर्वशी—(अपवार्य ।) सल्लं णिअ हिअआदो अवणीदम् ।

राजा—परमनुगृहीतोऽस्मि परमेश्वरेण ।

नारदः—युक्तम् ।

त्वत्कार्यं वासवः कुर्यात्त्वं च तस्येष्टकार्यकृत् ।
सूर्यः संवर्धयत्यग्निमग्निः सूर्यं स्वतेजसा ॥ २० ॥

(आकाशमवलोक्य ।) रम्भे, उपनीयतां महेन्द्रेण संभृतः कुमारस्याभिषेकः ।

१ शल्यमिव हृदयादपनीतम् ।

विष्टरः आसनम् । अवहितः [illegible] महीयते इति [illegible] ॥ प्रभावेन पश्यति तथोक्तः ॥ त्रिकालदर्शिभिः [illegible] भविष्यद्युद्ध सुरविमर्दः देवदानवसङ्ग्रामः भावी [illegible] । संयुगे युद्धे साधुः सांयुगीनः । सांयुगीनो रणे साधुः इत्यमरः । शस्त्रन्यासः शस्त्रत्यागः । यावदायुः यावज्जीवम् ॥ उर्वशी । शल्यमिव हृदयादपनीतम् ॥ त्वत्कार्यमिति । वासवः इन्द्रः । इष्टानि कार्याणि करोतीति तथोक्तः । अग्निर्यो हि [illegible] सूर्यमनु [illegible] सूर्यं [illegible] ॥ २० ॥ रम्भा । अथवा

रम्भा—अअं से अहिसेअसंभारो[1] ।

नारद—उपवेश्यतामयमायुष्मान्भद्रपीठे ।

(रम्भा कुमारं भद्रपीठ उपवेशयति ।)

नारद—(कुमारस्य शिरसि कलशमावर्ज्य ।) रम्भे, निर्वर्त्यतामस्य शेषो विधिः ।

रम्भा—(यथोक्तं निर्वर्त्य ।) वच्छ, पणम भअवन्दं पिदरो अ[2] ।

(कुमारस्तथा प्रणमति ।)

नारद—स्वस्ति भवते ।

राजा—कुलधुरंधरो भव ।

उर्वशी—पिदुणो आराहओ होहि[3] ।

(नेपथ्ये वैतालिकद्वयम् ।)

प्रथमः—विजयतां युवराजः ।

अमरमुनिरिवात्रिः स्रष्टुरत्रेरिवेन्दु-
बुध इव शिशिरांशोर्बोधनस्येव देवः ।
भव पितुरनुरूपस्त्वं गुणैर्लोककान्तै-
रतिशयिनि समस्ता वंश एवाशिषस्ते ॥ २१ ॥

---

१ अयमस्याभिषेकसंभारः ।
२ वत्स प्रणम भगवन्तं पितरौ च ।
३ पितुराराधको भव ।

स्याभिषेकसंभारः । संभारो विस्तरसम्भोगोपकरणसामग्री ॥ भद्रपीठे देवार्चन समासनम् । भद्रासनलक्षणं चोक्तं देवीपुराणे— हेमं च राजतं ताम्रं क्षीरवृक्षमयं च वा । भद्रासनं प्रकर्तव्यं सार्धहस्तसमुच्छ्रितम् ॥ सपादहस्तमानं च राज्ञो माण्डलिकान्तरात् ॥ वराद्धर्वहितानां च— त्रिविधस्त्वासोत्कर्षो हस्तः पादाधिकोऽधमुत्तमः । माण्डलिकानन्तरचित्तसमराज्यार्थिनां शुभम् ॥ इति ॥ रम्भा । वत्स प्रणम भगवन्तं पितरौ च ॥ उर्वशी । पितुराराधको भव । पितुरस्य वचनानि भवन्तु इत्यपि क्वचित्पाठः । यथापि नैतच्छुभमुच्यते ततस्तस्य भवति सर्वं नेपथ्ये । प्रथमो वैतालिकः । अमरमुनिरिति । बोधनो बुधः । एवं इति पाठेऽप्यर्थः स एव । देवो राजा । पुरूरवा इत्यर्थः । राजा भ्रारको

द्वितीयः—

तव पितरि पुरस्तादुन्नतानां स्थितेऽस्मिन्
स्थितिमति च विभक्तां त्वय्यनाकम्प्यधैर्ये ।
अधिकतरमिदानीं राजते राजलक्ष्मी
हिमवति जलधौ च व्यस्तनीयेव गङ्गा ॥ २२ ॥

रम्भा—दिट्ठिआ पिअसही पुत्तअस्स जुवराअसिरीं पेक्खिअ भत्तुणो अविरहेण वड्ढदि[1] ।

उर्वशी—मे साधारणो ज्जेव एसो अब्भुदओ । (कुमारं हस्ते गृहीत्वा ।) जाद, जेट्ठमादरं वन्देहि[2] ।

राजा—तिष्ठ । सममेव तत्रभवत्याः समीपं यास्यामस्तावत् ।

नारदः—

आयुषो यौवराज्यश्रीः स्मारयत्यात्मजस्य ते ।
अभिषिक्तं महासेनं सैनापत्ये मरुत्वता ॥ २३ ॥

राजा—अनुगृहीतोऽस्मि मघवता ।

नारदः—भो राजन्, किं ते भूयः प्रियं करोतु पाकशासनः ।

१ दिष्ट्या प्रियसखी पुत्रकस्य युवराजश्रियं प्रेक्ष्य भर्तुरविरहेण वर्धते ।

२ ननु साधारण एवायमभ्युदयः । जात, ज्येष्ठमातरं वन्दस्व ।

[illegible]

राजा—अतः परमपि प्रियमस्ति । यदि भगवान्पाकशासनः प्रसादं करोतु । तत्

(भरतवाक्यम्)

परस्परविरोधिन्योरेकसंश्रयदुर्लभम् ।
संगतं श्रीसरस्वत्योर्भूयादुद्भूतये सताम् ॥ २४ ॥

अपि च ।

सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु ।
सर्वः कामानवाप्नोतु सर्वः सर्वत्र नन्दतु ॥ २५ ॥

(इति निष्क्रान्ताः सर्वे ।)

पञ्चमोऽङ्कः ।

समाप्तमिदं श्रीकालिदासकृतं विक्रमोर्वशीयं नाम त्रोटकम् ।

इ ॥ परस्परेति । संश्रय आश्रयः । संगतं मिलनम् । उद्भूतये उत्कर्षभूत्यै ॥ २४ ॥ सर्व इति । दुर्गाणि दुःखानि । भद्राणि कल्याणानि । 'श्वःश्रेयसं शिवं भद्रं कल्याणम्' इत्यमरः । कामानभिलाषान् । 'कामोऽभिलाषः' इत्यमरः । सर्वत्र सर्वस्मिन्स्थले सर्वस्मिन्काले च नन्दतु आनन्दं प्राप्नोतु ॥ २५ ॥

श्रीनिम्बेकरवंशभूषणमणिः श्रीतातभट्टात्मजः
श्रीमद्दीक्षितरङ्गनाथविबुधो धीरो धराविश्रुतः ।
श्रीनारायणबालकृष्णकृतिनौ जज्ञे तनूजौ स्फुर-
द्विद्वद्दन्तिकरीन्द्रकुम्भदलनीसंभारिपञ्चाननौ ॥

सर्वतन्त्रस्वतन्त्रश्रीबालकृष्णात्तनूद्भूतौ ।
श्रीवेणीमाधवबुधरङ्गनाथाभिधौ सुतौ ॥

व्योमकेशपुरभेदनवासी जानकीशपदपद्ममिलिन्दः ।
रङ्गनाथ इममाशु वितेने प्रीतये रघुवरस्य निबन्धम् ॥

कृतेयं विक्रमोर्वश्या रङ्गनाथमनीषिणा ।
प्रकाशिका काशिकादिपत्तनेषु प्रकाशताम् ॥

प्रेक्षाविशेषमथनेन वितर्कदाम्ना
भूम्ना परोपकृतये विबुधेश्वराणाम् ।
साहित्यसागरत एष समाकर्ष
ग्रन्थः सुधाधिककथः किल रङ्गनाथः ॥

पौरोभाग्यनिवेशितादायवनामापाततः पश्यता
मामूलं कलुषैकसद्मकृतामारभ्य स्तुतिं कुर्वताम् ।
किं न कार्यमनार्यसंगतिमतामाम्नायमिह श्रीमता
मानदोषकलिकाविकासितहृदां प्रेमैकनिष्ठं सताम् ॥

नयनधरणिभूधद्भूमिते(१७१२)ऽब्दे नभस्ये
ऽसितदल इह नागाना तिथावर्कवारे ।
सुरभिपगधिदैवत्येऽपि भे वृद्धियोगे
ऽकृत कृतमतिरेन रङ्गनाथ प्रपूर्णम् ॥

इत्थ सत्पदबन्धुरा गुणधुरा धाराधरालङ्कृते
सारा सत्कविसागरान्तरमिता मोदोल्लसत्सागरा ।
पीतांकान्तिभराचिराद्विरचिता श्रीरङ्गनाथाह्वये
नेयं भाववता नवत्वविरतं मामोदिनी भामिनी ॥

यदालिख्यापयदिदं रङ्गनाथस्तदा किल ।
रूपीद्वन्द्विधराधीरा समवेता बभूविरे ॥
निम्बेकरोपनामश्रीरङ्गनाथतनूजने ।
श्रीबालकृष्णविदुषो जगन्नाथाद्य पुस्तकम् ॥

इति श्रीमद्यायजूकमयरश्रिम्बेकरमौनिवंशोत्तंसरङ्गना
थसूनीक्षितकुक्षिजविदुषुन्दपुरन्दरश्रीबालकृष्ण
भट्टाङ्गोद्भूतरङ्गनाथविरचितायां विक्रमोर्वशी
प्रकाशिकायां पञ्चमाङ्कोऽयम् ॥

श्लोकसूची ।